# संस्कृतवार्ताः

**दिनाङ्क : 24/12/2024** **सायम् - 06:20**

**मुख्यवार्ताः**

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ल्याः नीत्यायोगे प्रतिष्ठितैः अर्थशास्त्रभिस्सह आय-व्ययसङ्कल्पनायाः प्राक् परामर्शसमित्यां भाग: स्वीकृत:।
- केन्द्र-प्रशासनेन ग्रामीण विकासाय उत्तरप्रदेशान्ध्रप्रदेशयोः कृते पञ्चदशतमस्य वित्तायोगस्य अन्तर्गतं द्विसहस्रकोटिरूप्यकाणाम् अनुदानम् अनावृत्तम् ।
- राष्ट्रियोपभोक्तृ-दिवसावसरे केन्द्रीय-उपभोक्तृविषयकमन्त्री प्रल्हादजोशी अद्य ई-वाणिज्यिकमञ्चेषु उद्यमगतभ्रामक-प्रथानाम् अभिज्ञानं उपभोक्तृणां शक्तिकरणं च उद्दिश्य नैकान् उपक्रमान् समारभत ।
- ऋतुविज्ञानविभागीय: महानिदेशकः सूचितवान् यत् भारतीय-ऋतुविज्ञान-विभागस्य पूर्वानुमानस्य यथार्थता विगतेषु दशवर्षेषु चत्वारिंशत् प्रतिशततः पञ्चाशत् प्रतिशतं यावत् वर्धितास्ति।
- भारतीय- क्रिकेट्- नियन्त्रण- मण्डलेन बी. सी. सी. आई. इत्यनेन पञ्चविंशत्यधिक –द्विसहस्रतमवर्षाय नवदशवयोवर्गीयाया: विंशति-प्रति-विंशति प्रतिस्पर्धाया: कृते पञ्चदश- सदस्यात्मिकीय-भारतीय-महिला-क्रिकेट-दलस्य घोषणा कृता ।

**प्रधानमन्त्री- नीत्यायोग:**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ल्याः नीत्यायोगे प्रतिष्ठितैः अर्थशास्त्रज्ञैः सह आय-व्ययसङ्कल्पनायाः प्राक् विहित-परामर्शसमित्यां भाग: स्वीकृत:। केन्द्रीयवित्तमन्त्री निर्मलासीतारामण: इत्येषा नीत्यायोगस्य प्रमुखः बी.वी.आर.सुब्रमण्यम इत्येष: अन्ये च वरिष्ठाधिकारिणः च सञ्जातोपवेशने भागं स्वीकृतवन्तः। केन्द्रीयाय-व्ययसंकल्पना पञ्चविंशत्यधिक-द्विसहस्र- षड्विंशत्यधिक-द्विसहस्रतमवर्षयोः पूर्व-आय-व्यय-सङ्ककल्पनापरामर्शं अस्मिन् मासे षष्ठे दिनाङ्के आरब्धः। श्रीमतीसीतारामण: इत्येषा विभिन्नराज्यानां वित्तमन्त्रिभिः, कृषकसङ्घैः, अर्थशास्त्रिभिः, सूक्ष्म लघु मध्यम उद्योगणां संस्थाभिः च सह परामर्शं कृतवती । केन्द्रीयवित्तमन्त्री आगामिन: फरवरीमासस्य प्रथमे दिनाङ्के लोकसभायां पञ्चविंशत्यधिक द्विसहस्र- षड्विंशत्यधिक द्विसहस्रतम वर्षयोः आय-व्यय-सङ्कल्पनापत्रं प्रस्तोतुं शक्नोति इति ।

**केन्द्र- प्रशासनं**

केन्द्र-प्रशासनेन ग्राम्यविकासाय उत्तरप्रदेशान्ध्रप्रदेशयोः कृते द्विसहस्रकोटिरूप्यकाणां पञ्चदशतमस्य वित्तायोगस्य अनुदानम् अनावृत्तम् | पंचायतीराजमन्त्रालयेन उक्तं यत्, उत्तरप्रदेशस्य कृते अष्टनवत्यधिक-पञ्चशतोत्तरैकसहस्र-कोटिरूप्यकाणि, आन्ध्रप्रदेशस्य कृते च षड्चत्वारिंशदधिक-चतुश्शतकोटिरूप्यकाणि अनुमोदितानि । प्रदत्तानुदानानाम् उपयोगः पञ्चायतीराजविभागैः तथा च ग्रामीण-स्थानीय-निकायेन विशिष्टस्थानानां आवश्यकतायै क्रियते। मन्त्रालयेनोक्तं यत्, ग्रामीणस्थानीयशासनस्य परिदृश्यं परिवर्तयितुं प्रशासनं पञ्चायतीराजसंस्थानां ग्रामीणस्थानीयनिकायानां कृते च प्रत्यक्षतया अनुदानं प्रददाति।

**राष्ट्रीयोपभोक्तृदिवसावसर:**

राष्ट्रीयोपभोक्तृदिवसावसरे केन्द्रीय-उपभोक्तृविषयकमन्त्री प्रल्हादजोशी अद्य ई-वाणिज्यिकमञ्चेषु उद्यमगतभ्रामकप्रथानाम् अभिज्ञानं उपभोक्तृणां शक्तिकरणं च उद्दिश्य नैकान् उपक्रमान् समारभत । श्रीजोशी उपभोक्तृणां रक्षणाय, ई-वाणिज्य-मञ्चेषु उद्यमगतभ्रामकप्रथानाम् अभिज्ञानाय च जागो-ग्राहक-जागो-जागृति-जागृति-डैशबोर्ड् इत्येते तन्त्राशा: उद्घाटितवान् । जागो ग्राहक जागो इति तन्त्राश: उपभोक्तुः आन्तार्जलिक क्रियाकलापावधौ सर्वेषां यू. आर. एल. इत्येतेषां विषये आवश्यकीम् ई-वाणिज्यिकसूचनाम् प्रदास्यति। यदि कोऽपि यू. आर. एल. इति असुरक्षितो भवितुम् अर्हति अपि च अवधानं तत्र आवश्यकं वा भवति तर्हि सूचयिष्यति। प्रल्हादजोशी स्वसन्देशे उपभोक्तुः अधिकारानां रक्षणाय, शक्तीकरणाय च प्रशासकीय-प्रतिबद्धतायाः प्रतिपुष्टिं कृतवान् । श्री जोशी इत्यनेन सर्वे हितधारकाः, व्यापार-ई-वाणिज्य-मञ्चः, नागरिक-समाजः, विनियामक-प्राधिकरणानि च नैतिक-आचरणानां, दृढ-उपभोक्तृ-अधिकारानां च प्रोत्साहनाय मिलित्वा कार्यं कर्तुं प्रार्थितम्। देशे उपभोक्तृ-क्रान्तेः महत्त्वं प्रकाशयितुं प्रतिवर्षं दिसम्बर्-मासस्य चतुर्विंशे दिनाङ्के राष्ट्रिय-उपभोक्तृ-दिवसः आचर्यते।

**प्रधानमंत्री – मध्यप्रदेश:**

पूर्वप्रधानमन्त्रिणः अटल- बिहारी-वाजपेयी वर्यस्य शततमे जयन्त्यवसरे प्रधानमन्त्री नरेन्द्र मोदी श्वः मध्यप्रदेशस्य यात्रार्थं गमिष्यति । असौ खजुराहो इत्यत्र बहुविध-विकासपरियोजनानाम् उद्घाटनं आधारशिलां च स्थापयिष्यति। प्रधानमन्त्री राष्ट्रियदृष्टिकोणयोजनायाः अन्तर्गतं देशस्य प्रथमा नद्यानां परस्परसंयोजनपरियोजनायाः केन-बेतवा नदीसंयोजकराष्ट्रीयपरियोजनायाः आधारशिलां स्थापयिष्यति। एषा परियोजना मध्यप्रदेशस्य उत्तरप्रदेशस्य च विभिन्नजनपदेभ्यः सिञ्चन- सौविध्यानि प्रदास्यति येन लक्षशः कृषकपरिवाराः लाभान्विताः भविष्यन्ति। अस्याः परियोजनायाः कारणात् अस्य क्षेत्रस्य जनानां कृते पेयजलापूर्तिरपि भविष्यति। प्रधानमन्त्री श्रीमोदी अटलबिहारीवाजपेयीवर्यस्य शततमस्य जन्मदिवसस्य अवसरे प्रैष्यचिटिकायाः पत्रं मुद्रायाः च विमोचनं करिष्यति। सः त्रिपञ्चाशदधिकैक शतोत्तरैकसहस्रं यावत् अटलग्रामसुशासनभवनानां आधारशिलामपि स्थापयिष्यति। एतानि भवनानि स्थानीयस्तरे सुशासनं प्रति नेतुम् ग्रामपञ्चायतानां कार्यस्य व्यावहारिकसञ्चालने उत्तरदायित्वस्य च महत्त्वपूर्णां भूमिकां निर्वहन्ति इति ।

**भारतीय-ऋतु विज्ञान-विभाग:**

भारतीय-ऋतु विज्ञान-विभागस्य पूर्वानुमानस्य यथार्थता विगतेषु दशवर्षेषु चत्वारिंशत् प्रतिशत तः पञ्चाशत् प्रतिशतं यावत् वर्धिता अस्ति। प्रसारमाध्यमैस्सह वार्तालापं कुर्वन्, ऋतुविज्ञानविभागीय: महानिदेशकः मृत्युंजय महापात्रा इत्ययम् अवदत् यत् प्रचण्डवृष्टेः पूर्वानुमानस्य यथार्थतापि षष्टी प्रतिशतात् अशीतिप्रतिशतं यावत् वर्धिता अस्ति इति।

**फ्रान्सदेश**

फ्रान्सदेशे पूर्वमन्त्रिमण्डलस्य विघटनस्य अनन्तरं प्रधानमन्त्री फ्रेन्कोइस् बायरू इत्येष: नूतनसर्वकारस्य घोषणाम् कृतवान्। पूर्वप्रधानमन्त्रिणौ मैनुअल् वाल्स- एलिजाबेथ् बोर्न इत्येतौ च नवमन्त्रिमण्डले सम्मिलितौ अभवताम् । वाल्स इत्येष: विदेशमन्त्रालयस्य नेतृत्वं करिष्यति, बोर्नइत्येष: च राष्ट्रियशिक्षा- उच्चशिक्षा- अनुसन्धानमन्त्रालयानां च नेतृत्वं करिष्यति ।

**श्याम-बेनेगलः**

प्रसिद्धः चलच्चित्र-निर्देशकः श्याम-बेनेगलः गतदिने मुम्बय्यां दिवंगतः। सः नवति-वर्षीयः आसीत्। वृक्क-सम्बन्धि-रोगेण पीडितः बेनेगलः मुम्बई-नगर्याम् एकस्मिन् चिकित्सालये स्वप्राणान् अत्यजत्। प्रख्यातस्य चलच्चित्र- निर्मातुः श्याम-बेनेगलस्य अद्य मध्याह्ने दादरनगरस्य शिवाजी पार्क इत्यस्मिन् श्मशानघट्टे पूर्णेन राजकीयसम्मानेन अन्तिमसंस्कारः विहितः । एषः प्रतिष्ठितः निर्माता अनेकैः राष्ट्रियपुरस्कारैः अथ च पद्मश्री-पद्मभूषण- सम्मानाभ्याम् अलङ्कृतः आसीत् । एतदतिरिच्य पञ्चाधिक-द्विसहस्रतमे वर्षे चलच्चित्रजगतः भारतस्य च सर्वोच्चपुरस्कारेण दादा-साहबफाल्के पुरस्कारेण विभूषितो जातः ।

**उपराष्ट्रपतिः**

उपराष्ट्रपतिः जगदीप-धनखडः श्वः आरभ्य तेलङ्गाना-राज्यस्य मेडक-हैदराबाद-नगरयोः द्विदिवसीययात्रायां गच्छतीति। स्व-यात्राप्रवासे, श्री धनखडः तेलङ्गाना-राज्यस्य टुनिकी-नगरे भारतीय-कृषि-अनुसंधान-कृषि-विज्ञान-केन्द्रे प्राकृतिक-जैविक-कृषक-शिखरसम्मेलने मुख्यातिथिरूपेण अध्यक्षो भविष्यति।

**क्रिकेट्-वार्ता:**

भारतीय- क्रिकेट्- नियन्त्रण- मण्डलेन बी. सी. सी. आई. इत्यनेन पञ्चविंशत्यधिक – द्विसहस्रतमवर्षाय नवदशवयोवर्गीयाया: विंशति-प्रति-विंशति प्रतिस्पर्धाया: कृते पञ्चदश-सदस्यात्मिकीय-भारतीय- महिला- क्रिकेट-दलस्य घोषणा कृता । निकीप्रसादः अस्य दलस्य नेतृत्वं विधास्यति ।

**।।इति वार्ता:।।**